# Shri Virabhadra Kavacham

# श्रीवीरभद्रकवचम्

## Document Information

Text title : Virabhadra Kavacham

File name : vIrabhadrakavacham.itx

Category : shiva

Location : doc_shiva

Proofread by : NA

Latest update : October 8, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 2, 2024

*sanskritdocuments.org*

# श्रीवीरभद्रकवचम्

ॐ अस्य श्री वीरभद्रकवचमहामन्त्रस्य पशुपति ऋषिः
अनुष्टुप्छन्दः, श्रीभद्रकालीसमेत वीरभद्रो देवता,
ह्रां बीजं ह्रीं शक्तिः ह्रौं किलकं, श्रीभद्रकालीसमेत
वीरभद्रेश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

ध्यानम् -
रुद्ररौद्रावतारं हुतबहुनयनं चोर्ध्वकेशं सुदंष्ट्रं
व्योमाङ्गं भीमरुपं किणिकिणिरमसज्वालमाला वृताङ्गम् ।
भूतप्रेताधिनाथं करकमलयुगे खङ्गपात्रे वहन्तं
वन्दे लोकैकवीरं त्रिभुवनविनुतं श्यामलं वीरभद्रम् ॥

अथ कवचम् -
ॐ ललाटं वीरभद्रं व्याच्चक्षुषी चोर्ध्वकेशभृत् ।
भ्रूमध्यं भूतनाथोव्यान्नासिकां विरविग्रहः ॥ १॥

कपाली कर्णयुगलं कन्धरं नीलकन्धरः ।
वदनं भद्रकालीशो चुबुकं चन्द्रखण्डभृत् ॥ २॥

करौ पाशकरः पातु बाहू पातु महेश्वरः ।
ऊरुस्थलं चोग्रदंष्ट्राऽऽनन्दात्मा हृदम्बुजम् ॥ ३॥

रुद्रमूर्तिर्नाभिमध्यं कटिं मे पातु शूलभृत् ।
मूर्धानं पञ्चमूर्धा व्यान्निटलं निर्मलेन्दुभृत् ॥ ४॥

कपोलयुग्मं कापाली जिह्वां मे जीवनायकम् ।
स्वसद्वयं पशुपतिलिङ्गं मे लिङ्गरूपधृत् ॥ ५॥

सर्वाङ्गुलीः सर्वनाथो नखन्मे नागभूषणः ।
पार्श्वयुग्मं शक्तिहस्तो सर्वाङ्गं देववल्लभः ॥ ६॥

सर्वकार्येषु मां पायात् भद्रकाली मनोहरः ।

ब्रह्मराक्षसपैशाचवेतालरणभूमिषु ॥ ७॥

सर्वेश्वरः सदा पातु सर्वदेवमदापहः ।
शीतोष्णयोश्चान्धकारे निम्नोन्नतभुविस्थले ॥ ८॥

कण्टकेष्वपि दुर्गेषु पर्वतेऽपि च दुर्गमे ।
शस्त्रास्त्रमुखभल्लूकव्याघ्रचोरभयेषु च ॥ ९॥

राजाद्युपद्रवेचैव पायाच्छरभरूपधृत् ।
य एतद्वीरभद्रस्य कवचं पठतेन्नरः !
षोडशम्बत्युभयं मुक्त्वा सुखं प्राप्नोति निश्चयम् ॥ १०॥

मोक्षार्थी मोक्षमाप्नोति धनार्थी लभते धनं !
विद्यार्थी लभते विद्यां जयार्थी जयमाप्नुयात् !!
देहान्ते शिवसायुज्यमवाप्नोति न संशयम् ।
एतत्कवचमीशानि न देयं यस्य कस्य चित् ॥ ११॥

सुकुलीनाय शान्ताय शिवभक्ती रताय च ।
शिष्याय गुरुभक्ताय दातव्यं परमेश्वरी ॥ १२॥

तवसस्नेहान्मया प्रोक्तमेतत्ते कवचं महत् ।
गोपनीयं प्रयत्नेन त्वयैवं कुलसुन्दरी ॥ १३॥

॥ इति श्रीवीरभद्रकवचं सम्पूर्णम् ॥

Note:
Originally, it was mentioned in colophone that this kavacham is from AkAshabhairavakalpa in chatvAriMshat paTalaH. However, it is not readily found in printed AkAshabhairavakalpa.

*Shri Virabhadra Kavacham*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*